गुणा बहुवारशब्दे उक्ताः। बहुयार इति ख्यातः। यथा, मनुसंहितायाः।५।६। श्लोकस्य टीकायां कुल्लूकभट्टः। "शेलुं बहुवारकफलं गोभवं पेयूषं नवप्रसूताया गोः क्षीरमग्निसंयोगात् कठिनं भवति एतान् यत्नतस्त्यजेत्॥")

बहुविधः, त्रि, (बहवो विधा यस्य।) नानाप्रकारः। तत्पर्य्यायः। विविधः २ नानारूपः ३ पृथग्विधः ४। इत्यमरः। ३।१।८३॥ (यथा, गीतायाम्। ४।३२।
"एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे॥")

बहुविस्तीर्णा, स्त्री, (बहु यथा स्यात् तथा विस्तीर्णा।) कुचिकाटक्षः। इति शब्दचन्द्रिका॥ कुचइ इति भाषा॥

बहुवीजं, क्ली, (बहूनि वीजानि यस्य।) गन्धगात्रम्। इति शब्दचन्द्रिका॥ आता इति भाषा॥ अस्य गुणा आत्मप्यशब्दे द्रष्टव्याः॥

बहुवीर्य्यः, पुं, (बहु वीर्य्यं तेजो यस्य।) विभीतकः। इति जटाधरः॥ तण्डुलीयशाकः। शाल्मलिवृक्षः। मरुवः। इति राजनिर्घण्टः॥

बहुवीर्य्या, स्त्री, (बहु वीर्य्यं तेजो यस्याः।) भूम्यामलकी। इति राजनिर्घण्टः॥

बहुव्रीहिः, पुं, षड्समासान्तर्गतसमासविशेषः। (मुग्धबोधमते।) अस्य साङ्केतिकसंज्ञा हः। यथा, अन्यार्थानां दानां हसंज्ञः। उदाहरणं यथा। पीतमम्बरं यस्यासौ पीताम्बरो हरिः। इति वोपदेवः॥ स च तुल्याधिकरणानां पदानां अन्यार्थत्वे स्यादिति बोध्यम्। यथा पीताम्बरादि। भिन्नाधिकरणानान्तु पुत्त्राय धनमस्य शिष्याय विद्या अस्य इत्यादौ न स्यात्। समालक इत्युदाहरणेन कदाचिद्भिन्नाधिकरणानाञ्च स्यात् धर्म्मे वृत्तिर्यस्यासौ धर्म्मवृत्तिः। एवं कामवृत्तिः उरसि लोमा कण्ठे काल इत्यादि। एवं पीताम्बर इत्युदाहरता विशेषणविशेष्ययोः समासे विशेषणमेव पूर्ब्बं स्यादिति सूचितम्। तेन पीताम्बर इत्यत्र अम्बरपीत इति न स्यात्। एवं त्रिलोचनः चतुर्भुजः दीर्घकेशीत्यादि। एवं पीताम्बर इत्युदाहरता क्वचित् क्तान्तविशेषणं पूर्ब्बं स्यात् क्वचित् परं वा स्यात् इति सूचितम्। तेन अवाहृतखेरगतेरिति। अर्द्धेश्चितं भर्त्तुरपश्चितोदयमिति। स हृतचूडकलकाकपक्षकैरित्यादि रघुः॥ सुखजातः सुरापीतो कृष्णधो माल्यधारक इति। एवं जातदन्तः दन्तजातः जातश्मश्रुः श्मश्रुजातः पीततैलः तैलपीतः पीतघृतः घृतपीतः ऊढ़भार्य्यः भार्य्योढ़ः गतभार्य्यः भार्य्यागतः गतार्थः अर्थगतः अग्न्याहितः आहिताग्निः पुत्त्रजातः जातपुत्त्रः जातयामः यामजातः दुःखजातः जातदुःखः गडुकण्ठः कण्ठगडुः इत्यादि बोध्यम्। एवमुद्यतचक्रः चक्रोद्यतः उद्यतासिः अस्युद्यतः उद्यतगदः गदोद्यतः उद्यतखड्गः खड्गोद्यत इति। आयुधेभ्यो नित्यं पूर्ब्बमिति जौमराः॥ यथा उद्यतचक्र इत्यादि। एवं सर्ब्बनामसवलात् पूर्ब्बम्। सर्ब्बश्वेतः। संख्यासर्ब्बनाम्नोः संख्यापूर्ब्बं स्यात्। द्विपरः त्रिपूर्ब्बः। सप्तम्यन्तमचन्द्रादेः। सप्तम्यन्तं पदं पूर्ब्बं स्यान्न चन्द्रादेः। धर्म्मे वृत्तिर्यस्यासौ धर्म्मवृत्तिः उरसि लोमा कण्ठेकाल इत्यादौ उरसिजवत् लुक्। चन्द्रादेस्तु चन्द्रशेखरः चन्द्रचूड़ः पद्मनाभः शूलपाणिः कुशहस्तः। प्रियो वा। गुड़प्रियः प्रियगुड़ः। किञ्च आरूढ़ो वानरो यं स आरूढ़वानरो वृक्षः। दृष्टः कृष्णो येन स दृष्टकृष्णो भक्तः। दत्ता भूमिर्यस्मै स दत्तभूमिर्व्विप्रः। निर्गताः पक्षिणो यस्मात् वृक्षात् स निर्गतपक्षी वृक्षः। चत्वारो भुजा यस्यासौ चतुर्भुजो विष्णुः। बहूनि नक्षत्राणि यत्र तद्बहुनक्षत्रमाकाशम्। इति द्वितीयान्ताद्यन्यपदार्था बहुव्रीहयः सर्ब्बैर्मन्यन्ते। स्वमते तु प्रथमान्तान्यपदार्थोऽपि यथा सह मात्रा वर्त्तते योऽसौ समातृकः एवं सपक्षकः सनामकं ब्राह्मणमानिनीत्यादि। इति दुर्गादासः॥ *॥ (बहवो व्रीहयो यस्येति व्युत्पत्त्या) प्रचुरधान्ययुक्ते, त्रि। यथा,—
"द्वन्द्वो द्विगुरपि चाहं मद्गेहे नित्यमव्ययी-
भावः।
तत्पुरुष! कर्म्म धारय येनाहं स्यां
बहुव्रीहिः॥"
इति प्राचीनाः॥

बहुशत्रुः, पुं, (बहवः शत्रवो यस्य।) चटकः। इति शब्दचन्द्रिका॥ (बहुशत्रुविशिष्टे, त्रि। तृतीयायां तिथौ पटोलभक्षणेन बहुशत्रुः स्यात्। यथा, तिथितत्त्वे।
"कुष्माण्डे चार्थहानिः स्याद्बृहत्यां न स्मरे-
द्धरिम्।
बहुशत्रुः पटोले स्यात् धनहानिस्तु मूलके॥")

बहुशः, व्य, (बहूनि ददाति करोत्यादि वा। बहु + "बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्।" ५। ४। ४२। इति शस्।) बहूनि। इति व्याकरणम्॥ (यथा, मार्कण्डेये। ५२। २६।
"कथ्यन्ते बहुशश्चैते पिता पुत्त्रत्रयस्य यत्॥")

बहुशल्यः, पुं, (बहु शल्यं यस्य।) रक्तखदिरः। इति राजनिर्घण्टः॥ अनेकशल्ययुक्ते, त्रि॥

बहुशालः, पुं, (बहुभिः शालते इति। बहु + शाल + अच्।) स्नुही। इति राजनिर्घण्टः॥

बहुशिखा, स्त्री, (बह्वी शिखा यस्याः।) जलपिप्पली। इति राजनिर्घण्टः॥ (बह्वी शिखा इति कर्म्मधारयसमासः।) अनेकशिखा च॥

बहुसन्ततिः, पुं, (बह्वी सन्ततिर्विस्तारोऽन्वयो वा यस्य।) ब्रह्मयष्टिः। इति शब्दचन्द्रिका॥ वेडुँयाश इति भाषा॥ अनेकसन्तानयुक्ते, त्रि॥

बहुसम्पुटः, पुं, (बहुः सम्पुटो यस्य।) विष्णुकन्दः। इति राजनिर्घण्टः॥

बहुसारः, पुं, (बहुः सारः स्थिरांशो यस्य।) खदिरः। इति राजनिर्घण्टः॥ (बहुसारविशिष्टे, त्रि। यथा, शतपथब्राह्मणे। ११। ७। ३। १॥ "स य एव बहुसारः॥")

बहुसुता, स्त्री, (बहुः सुतः सन्ततिर्मूलं वा यस्याः।) शतमूली। इत्यमरः। २। ४। १५॥

बहुसूः, स्त्री, (बहून् सूते या। बहु + सू + क्विप्।) शूकरी। इति शब्दरत्नावली॥ बहुप्रसवा च॥

बहुसूतिः, स्त्री, (बहुः सूतिः प्रसवो यस्याः।) बह्वपत्या गौः। इत्यमरः। २। ६। ७॥ बहुसन्तानप्रसवा च॥

बहुस्रवा, स्त्री, (बहु यथा स्यात् तथा स्रवति या। बहु + स्रु + अच्। टाप्।) शल्लकीवृक्षः। इति शब्दचन्द्रिका॥ अनेकक्षरणशीला च॥

बहुस्वनः, पुं, (बहुः प्रचण्डः स्वनः शब्दो यस्य।) पेचकः। इति केचित्॥ अनेकशब्दयुक्ते, त्रि॥

बह्वपत्यः, पुं स्त्री, (बहूनि अपत्यानि यस्य।) शूकरः। मूषकः। इति राजनिर्घण्टः॥ बहुसन्तानयुक्ते, त्रि॥

बह्वाशी, [न्] त्रि, (बहु अश्नातीति। बहु + अश् + णिनि।) बहुभोजनशीलः। यथा, चाणक्ये। ६६।
"बह्वाशी स्वल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः।
प्रभुभक्तश्च शूरश्च ज्ञातव्याः षट् शुनो गुणाः॥"
(बह्वी आशा यस्य।) बह्वाशाविशिष्टः॥ (धृतराष्ट्रपुत्त्रविशेषे, पुं। यथा, महाभारते। १। ११७। १८।
"आदित्यकेतुर्बह्वाशी नागदन्तोऽग्रयाय्यपि॥")

बह्वृक्, स्त्री, ऋग्वेदः (बह्व्य ऋचो यस्मिन्।) ऋक्, क्ली। इति मुग्धबोधव्याकरणम्॥ "बह्व्य ऋचोऽधीतवा येन इति व्युत्पत्त्या ऋग्वेदज्ञे ब्राह्मणे, पुं। यथा, मनुः। ३। १४५।
"यत्नेन भोजयेत् श्राद्धे बह्वृचं वेदपारगम्॥"
केचित् बह्वृच इत्यकारान्तमिच्छन्ति॥)

बह्वृची, स्त्री, (बह्वृचस्य ऋग्वेदज्ञस्य पत्नी। बह्वृच + ङीप्।) ऋग्वेदवेत्तुः पत्नी। इति जटाधरः॥ (बह्व्य ऋचोऽधीतवा यया इति विग्रहे अध्वर्युनामाध्येत्री स्त्री। अनृचबह्वृचावध्येतर्य्येवेति वचनात्। "ऋक्पूरब्धूःपथामानक्षे।" ५। ४। ७४। इत्यप्रत्ययः समासान्तः। "गोत्रञ्च चरणैः सह" इति जातित्वात् ङीष्। यद्यपि स्त्रीणां स्वाध्यायाध्ययनं निषिद्धं तथापि पुरा कल्पेष्वेतदासीत्। यथाह यमः।
"पुराकल्पेषु नारीणां मौञ्जीबन्धनमिष्यते।
अध्यापनञ्च वेदानां सावित्रीवचनं तथा॥"
इति॥)

बा(वा)ड़, ऋ ङ आप्लावे। स्नाने। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-अक०-सेट्। आप्लावः उन्मज्जनम्। इति दुर्गादासः॥) वोपदेवेन अन्तःस्थवकारादौ गृहीतः॥ (बाड़ते। ऋदित् चङि न ह्रस्वः। अबबाड़त्॥)

बा(वा)ड़वं, क्ली, (बड़वानां समूहः। बड़वा + "खण्डिकादिभ्यश्च।" ४। २। ४५। इत्यञ्।) बड़वासमूहः। इत्यमरः॥ (बड़वाया इद-